श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ त्र्यधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्र्यधिकशततमः सर्गः ॥

## श्रीरामपार्श्वे कालस्यागमनं समयं कृत्वा तेन सह तस्य वार्तालापायोद्यमः

कस्यचित् त्वथ कालस्य रामे धर्मपरे स्थिते।
कालस्तापसरूपेण राजद्वारमुपागमत्॥ **7.103.1** ॥

सोऽब्रवील्लक्ष्मणं वाक्यं धृतिमन्तं यशस्विनम्।
मां निवेदय रामाय सम्प्राप्तं कार्यगौरवात्॥ **7.103.2** ॥

दूतो ह्यतिबलस्याहं महर्षेरमितौजसः।
रामं दिदृक्षुरायातः कार्येण हि महाबल॥ **7.103.3** ॥

तस्य तद् वचनं श्रुत्वा सौमित्रिस्त्वरयान्वितः।
न्यवेदयत रामाय तापसं तं समागतम्॥ **7.103.4** ॥

जयस्व राजधर्मेण उभौ लोकौ महाद्युते।
दूतस्त्वां द्रष्टुमायातस्तपसा भास्करप्रभः॥ **7.103.5** ॥

तद् वाक्यं लक्ष्मणोक्तं वै श्रुत्वा राम उवाच ह।
प्रवेश्यतां मुनिस्तात महौजास्तस्य वाक्यधृक्॥ **7.103.6** ॥

सौमित्रिस्तु तथेत्युक्त्वा प्रावेशयत तं मुनिम्।
ज्वलन्तमेव तेजोभिः प्रदहन्तमिवांशुभिः॥ **7.103.7** ॥

सोऽभिगम्य रघुश्रेष्ठं दीप्यमानं स्वतेजसा।
ऋषिर्मधुरया वाचा वर्धस्वेत्याह राघवम्॥ **7.103.8** ॥

तस्मै रामो महातेजाः पूजामर्घ्यपुरोगमाम्।
ददौ कुशलमव्यग्रं प्रष्टुं चैवोपचक्रमे॥ **7.103.9** ॥

पृष्टश्च कुशलं तेन रामेण वदतां वरः।
आसने काञ्चने दिव्ये निषसाद महायशाः॥ **7.103.10** ॥

तमुवाच ततो रामः स्वागतं ते महामते।
प्रापयास्य च वाक्यानि यतो दूतस्त्वमागतः॥ **7.103.11** ॥

चोदितो राजसिंहेन मुनिर्वाक्यमभाषत।
द्वन्द्वे ह्येतत् प्रवक्तव्यं हितं वै यद्यवेक्षसे॥ **7.103.12** ॥

यः शृणोति निरीक्षेद् वा स वध्यो भविता तव।
भवेद् वै मुनिमुख्यस्य वचनं यद्यवेक्षसे॥ **7.103.13** ॥

तथेति च प्रतिज्ञाय रामो लक्ष्मणमब्रवीत्।
द्वारि तिष्ठ महाबाहो प्रतिहारं विसर्जय॥ **7.103.14** ॥

स मे वध्यः खलु भवेद् वाचं द्वन्द्वसमीरिताम्।
ऋषेर्मम च सौमित्रे पश्येद् वा शृणुयाच्च यः॥ **7.103.15** ॥

ततो निक्षिप्य काकुत्स्थो लक्ष्मणं द्वारि सङ्ग्रहम्।
तमुवाच मुने वाक्यं कथयस्वेति राघवः॥ **7.103.16** ॥

तत् ते मनीषितं वाक्यं येन वासि समाहितः।
कथयस्वाविशङ्कस्त्वं ममापि हृदि वर्तते॥ **7.103.17** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे त्र्यधिकशततमः सर्गः॥